Shodhshauryam, International Scientific Refereed Research Journal
© 2023 SHISRRJ | Volume 6 | Issue 2 | ISSN : 2581- 6306

# वैदिकवाङ्मये वनस्पति विषयकचिन्तनम्

डॉ. तारकरामकुमार शर्मा
आचार्यः, श्री वेङ्कटेश्वरवेदविश्वविद्यालयः, तिरुपति।

Article Info

Publication Issue :
March-April-2023
Volume 6, Issue 2
Page Number : 110-115
Article History
Received : 07 March 2023
Published : 15 April 2023

**लेखसंक्षेपः**-वेदशब्दः विद् – ज्ञाने इत्यस्माद्धातोः उत्पन्नत्वात् वेदयतीति व्युत्पत्त्या वेदशब्दः अन्वर्थः इति सर्वलोक विदितमेव । अतः अस्मिन् वैदिकवाङ्मये अणुशः विज्ञानमेवोप लभ्यते । शोधलेखे अस्मिन् वनस्पतिविज्ञानदायकानि वैदिकवाक्यानि उद्धृत्य वृक्षाणां भेदाः तत्तद्वृक्षाणां गुणविशेषाः इत्येवमादिकं वृक्षशास्त्रमाश्रित्य समारचितोऽयं शोधलेखः।

**कुञ्चिका पदानि** - वनस्पतिः, बहुप्रकृतिः, फलम्, पुष्पाणि, वीरुधः, ओषधयः, वर्गीकरणम् संरक्षणम्, वैश्वदेवी, विषदूषणी, वीङ्गः, मधुमयम्, निरामयम्, संस्थेयम्, सन्ततिमयम् ।

**वनस्पति परिचयः**- **"सर्वज्ञानमयो हि सः"** इति सार्वजनीनः, सर्वमान्यः, सर्वानुमोदनीयश्चयः वैदिकः सिद्धान्तः, तेनोपक्रमेण वनस्पतिगजत् वैदिकवाङ्मये विचारमहिम्नाप्रभूतां प्राप्य प्रवृत्तेति परिशीलनेन प्रतिपदं प्रत्येति। अतस्तस्य खलु आविष्करणमाधुनिकविज्ञानजगति Botany इत्याख्यया प्रथ्य अनुसन्धानपद्धती तत्सर्वस्य वेदमूलत्वं व्यवस्थाप्यते च। वेदे वनस्पतीनामुपयोगित्वम्, महत्त्वम्, वर्गीकरणम्, विवरणम्, वृक्षरोपणम्, वृक्षरोगनिदानम्, वृक्षचिकित्सा, मानवसमाजस्य रक्षाकर्तृत्वम्, देवत्वम्, उपकारणतत्त्वम्, प्राणतत्त्वम्, वृक्षाणां मणिसन्धानञ्चेत्यादिभावेन विषयबाहुल्येन विवेचनं समाकलितं समलङ्कृतञ्च विद्यते।

अद्य यावदाविष्कृतानां समलङ्कृतानां विज्ञानानां विवेचनभूमिः वेद इति तद्विज्ञानविद्वद्भिर्विचारपुरस्सरं विषयीक्रियते । आधुनिकजगति पदार्थविज्ञानम्, रसायनविज्ञानम्, जन्तुविज्ञानम्, वनस्पतिविज्ञानम्, शिल्पविज्ञानम्, कृषिविज्ञानम्, ज्योतिर्विज्ञानम्, वृष्टिविज्ञानम्, भूगर्भविज्ञानम्, गणितशास्त्रञ्चेत्यादिभावेन यद्यत् स्वरूपं यच्च प्रारूपं वाऽक्षिलक्षीकृतमाधुनिक समालम्बितञ्च तत्सर्वं वेदसकाशात् लब्धवृत्तान्तं लब्धजन्म चेत्यसंशयम् । किन्तु प्रत्यवध विकासोन्मुखतां प्राप्य वेदोक्तप्राचीनस्वरूपं परिवर्त्तनमासाद्य च विवर्णितं तथ्यं भाषान्तरेण नामान्तरेण च नूतनाय कल्पते स्वरूपं विधत्त इति विचारोन्मुखा प्रतीतिः ।

तत्रत्यमेतदवधिविवेचनं वनस्पतिजगतः सर्वकालिकत्वं पुष्णाति प्रमाणीकरोति च । वनस्पतिजगत् सृष्टितत्त्वपरिधौ विधातुः सिसृक्षयाऽन्यदानविशेष इति त्रैकालिकं प्रतिपादनं निरन्तरं ज्ञानविज्ञानमयं चित्तं प्रहिणोति ।

**वनस्पतिः**- वनस्य पतिरिति विग्रहात् "षष्ठी"[1] इति सूत्रेण समासे "पारस्करप्रभृतीनि च सञ्ज्ञायाम्" [2] इति सूत्रेण सुडागमे (वृन + सुट् + पति वनस्पति) निष्पन्नोऽयं वनस्पतिशब्दः वृक्षलतादिविभिन्नार्थमादाय व्यवहारजगति प्रसिद्धिमातनोति । सूत्रकृताऽऽचार्यपाणिनिना वनस्य विभागद्वयम् ओषधिवनं वनस्पतिवञ्चेति भावेन साधिनं **विभाषौषधिवनस्पतिभ्यः**[3]। पुनश्च श्रेणीविभाजनं विहितम् ओषधिः वनस्पतिश्चेति भावेन । वनस्पतिः वृक्षः इतीमौ द्वौ पर्य्यायवाचिनौ शब्दौ । तथा हि सूत्रम् "अवयवे च प्राणयठोषधिवृक्षेभ्यः"[4] वार्त्तिककृता कात्यायनेनापि पाणिनेराशयो विषयेऽस्मिन् अङ्गीकृतः – **"बहुप्रकृतिः**

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**फलसेनावनस्पतिमृगशकुनि - क्षुद्रजन्तुधान्यतृणानाम्"** इति । ऋग्वेद वृक्ष इति तात्पर्येण तस्य शब्दस्य प्रयोगार्हताऽङ्गीकृता । ऐतरेयाब्राह्मणे कौषीतकीब्राह्मणे चौषधिभावेन ग्रहणं कृतम् - **प्राणो वनस्पतिः**[5] **प्राणो वै वनस्पतिः**[6] इति । अमरकोषे **"वनस्पत्यः फलैः पुष्पात् तैरपुष्पाद्वनस्पतिः । ओषधिः फलपाकान्ता स्यादबन्ध्यः फलेग्रहिः "**[7]। पुष्पं विना जायमानफले वृक्षे इति वाचस्पतिः। **"वनस्पतीनां सरसां नदीनां तेजोभृतां कान्तिभृतां दिशञ्च"** इति भट्टिकाव्योक्त्या वनस्पतिशब्दः वनतात्पर्येण प्रोक्तः । श्रीमद्भागवतपुराणे वनस्पतिः, ओषधिः, लता, त्वक्सारः, विरुध द्रुम इति भावेन वर्गीकरणं दृष्टम् **"वनस्पत्योषधिलता त्वक्सारा वीरुधो द्रुमाः"** इति ऋग्वेदे यजुर्वेदे अथर्ववेदे च वनस्पतिविषयके निवर्णनं तत्तथ्यमहिम्ना कृतं विद्यते । ऋवेदे जयुवेदे अथर्ववेदे च वनस्पतिविषयके विवर्णनं तत्तथ्यमहिम्ना कृतं विद्यते । ऋग्वेदे एतत्कृते वनिन्शब्दस्य प्रयोगः समाहृतः । तदुक्त्या **"तमोषधीश्च वनिनश्च"**[8] इति । अथर्ववेदे "वीरुध" इति शब्दः उपपादितः- "वनस्पतीन् वानस्पत्यान् ओषधीरुत वीरुधः"[9] इति वृक्ष - लता - ओषधिप्रभृतिभिरथैः शब्दोऽयं एतद्वाङ्गये प्रसिद्धिं प्राप्तः ष वेदोक्तप्रतिपादने वृक्ष-वनस्पतीनां सङ्ख्या विभिन्नतया गुणकार्यादिभेदेन परिगणिता जातेत्यवधिगम्यते । ऋग्वेदे - 67, यजुर्वेद - 82, अथर्ववेदे - 288 प्रकारकाः विभिन्नाः वनस्पतयः उल्लिखिताः सन्तीति **प्रियव्रतशर्मणा** तदीये **द्रव्यगुणविज्ञाने** विषयीकृतम्।

**वनस्पतिवर्गीकरणम्-** गुणधर्म- रङ्ग - फलाधारेण वनस्पतीनां वर्गीकरणमभिलषितं विद्यते ।

1. रङ्गाधारेण तद् बभ्रु, शुक्रम्, रोहणी, पृश्नि, असिक्री, कृष्णा इति सञ्ज्ञाभिः समाकलनम्। अथर्ववेदे व्युत्पाद्य-

या बभ्रुवो याश्च शुक्रा रोहणीरुत प्रश्नयः ।
असिक्नीः कृष्णा ओषधीः सर्वा अच्छावदामसि ।।[10]

2. स्वरूपस्याकरस्य वाऽऽधारेण - प्रस्तृणती, स्तम्बिनी, एकशुङ्गा, प्रतन्वती, अंशुमती, काण्डिनी, विशाखा इत्युपपादनम् । अथर्ववेदे प्रतिपन्नम् -

प्रस्तृणती स्तम्बिनीरेकशुङ्ग प्रतन्वतीरोषधीरा वदामि।
अंशुमतीः काण्डिनीर्या विशाखाह्वायामि ते वीरुधो वैश्वदेवीरुग्राः पुरुषजीवनीः।।[11]

3. गुणधर्माधारेण - जीवला, नघारिषा, अरुन्धती, उन्नयन्ती, मधुमती, प्रचेतस, मेदिनी, उग्रा, विषदूषणी, बलासनाशनी इति विवर्णितमथर्ववेदे । तथाह -

जीवलां नघारिषां जीवन्तीमोषधीमहम् ।
अरुन्धतीमुन्नयन्तीं पुष्पां मधुपतीमिह हुवेऽस्मा अरिष्टतातये।।[12]

4. फलाधारेण -पुष्पावती, प्रसूमती, फलिनी, अफल इति रूपायितमृग्वेदे - तद्यथा - "याः फलनीर्या अफलां"[13]

**वनस्पत्युत्पत्तिस्थलम्-** वनस्पतीनामुत्पत्तिस्थलानि सूक्ष्ममतयोद्दिष्टानि, यस्मान्मूलतत्त्वमन्वेष्टुं शक्यते । यजुर्वेदे अथर्ववेदे च परिचर्य्यया गोपायितं तथ्यमिदं प्रकाश्यते । पर्वतः, समतलभूमिः, शैवालम्, नदी, पुष्करिणी, सागराभ्यन्तरप्रदेशः, भूगर्भ इति । तथाहि -

अदो यदवधावत्यत्कमधि पर्वतात् ।
तत् ते कृष्णो भेषजं सुभेषजं यथाससि ।।[14]
तत् रोहन्त्याङ्गिरसीः पर्वतेषु समेषु च ।
तान नः पयस्वतीः शिवा ओषधीः सन्तु शं हृदे ।।[15]

अवकोल्बा उदकात्मान औषधयः। व्यृषन्तु दुरितं तीक्ष्णयः।।

उन्मुञ्चन्तीर्विवरुणा उग्रा या विषदूषणीः ।।[16]

तदास्रावस्य भेषजं तदु रोगमशीशम्।[17]

अरुस्राणमिदं महत् पृथिव्या अध्युद्धृतम् ।[18]

ऋग्वेदीय–यजुर्वेदीयविवेचनानुसारं प्रतीतिर्जायते यद् वनस्पतीनामुत्पत्तिः मानवसृष्टेः त्रिगुणं पुरा पुनः तदुत्पत्तिः सहस्राधिकस्थानेभ्यः सङ्गृहीता । तथापि –

या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा ।[19]

शतं वो अम्ब धामानि सहस्रमुत वो रुहः । [20]

**वनस्पतिहरितत्वम्-** वृक्षाणां हरतित्वे कारणमवितत्त्वमिति सिद्धान्तः । अवितत्त्वं नाम रक्षकत्त्वम्, यत् खलु कोषैः परिपुष्टम् । तस्मात् कारणात् हरितत्वं भातीति विचारपुरस्सरमाविष्करणमाधुनिकविदुषा वैज्ञानिकरीत्या कथ्यते । अथववेदे तथ्यमिदं विषयीकृतं दृश्यते। तथाहि–

अविर्वै नाम देवता देवता तेनास्ते परीवृता ।

तस्या रूपेणे वृक्षा हरिंता हरितस्रजः ।।[21] इति ।

**वनस्पतिसंरक्षणम्-** वनस्पतिः कल्याणकत्वतरुः सार्वकालिकसमाजाभिवृद्धौ जनजीवनपरिवृद्धौ चेति अभ्यर्हितविचारविमर्शाधारेण श्रुतिवाक्यानि विपञ्चीकृतानि विद्यन्ते । ऋक्–यजुः– अथर्ववेदेषु एतत्कृते बहुशो विवर्णनं संशाधितं समधिगतञ्च जायते ।

1. ऋग्वेदे – एतद्विधौ षड् मन्त्राः निगदिताः विद्यन्ते ।

1. ओषधिरिति मातरः ।[22]
2. वीरुधः पारयिष्णवः ।[23]
3. नित्यस्तोत्रो वनस्पतिः धीनामन्तः सबर्दुघः ।[24]
4. वनस्पतिभ्यिः पर्याभृतं सहः ।[25]
5. ओषधीर्वनस्पतीन् पृथिवीं पर्वतान् अपः ।
   ..................व्रता विसृजन्तो अधिक्षमि ।।[26]
6. मा काकम्बीरम् उद् वृहो वनस्पतिम् अशस्तीर्वि नीनशः ।[27]

वृक्षः संसारं पाति, मातृवाच्यः । मनुष्यं सञ्जीवयति, शक्तिचयस्य स्रोतववी, परमात्मनः वरदानम्। वनस्पतिमन्तरेण जीवनसमाजः स्थातुं नार्हति । वृक्षस्य छेदनमनुचितं कर्म, दण्डनीयेष्वपराधेष्वन्यतमः। वैज्ञानिकाः वनस्पतिजगत् परीक्ष्य च तथैवोपदिशन्ति सिद्धान्तं स्थिरीकुर्वन्ति च ।

2. यजुर्वेदे पुनः सप्त मन्त्रा श्रुतिपथे समायान्ति । तद्यथा –

1. ओषधीरिति मातरः ।[28]
2. वीरुधः पारयिष्णवः ।[29]
3. वनस्पतिः शमिता ।[30]
4. वनस्पते.... अस्मत् सखा ।[31]
5. मा ओषधीर्हिंसीः ।[32]
6. अपः पिन्व, ओषधीर्जिजव ।[33]

7. ओषध्यास्ते मूलं हिंसिषम् ।[34]

वनस्पतिः माता, रक्षाकर्ता, अस्मत्सखः, प्रदूषणं शमयति, वायुमण्डलस्य सर्वविधोपसर्गान् दूरीकरोति नाश्यति च । वनस्पतीनां कृते हिंसा त्याज्या । जलसेचनपुरस्सरं वनस्पतीनां परिवर्द्धनं सम्पाद्य सुरक्षा साधनीया ।

3. अथर्ववेदे तथ्यस्यास्य प्रकाशनं पञ्चभिः मन्त्रैः साधितम् ।

1. वीरुधो वैश्वदेवीः उग्राः पुरुषजीवनीः ।[35]
2. उग्रा या विषदूषणीः...... ओषधीः ।[36]
3. वने न वा यो न्यधायि[37] चाकम् ।
4. वनस्पतिः सह देवैर्न आगन् । रक्षः पिशाचान् अपवाधमानः।[38]
5. वनस्पते वीड्गो हि भूया अस्मत्सखा ।[39]

वृक्षेषु वनस्पतिषु च दैवीशक्तिः सञ्चिता वर्त्तते । प्रदूषणं नाशयतीति विचारात् विषदूषणी इति शब्दः प्रयुक्तः । परमात्मना ओषधीनां निर्माणं कृतम् ।

वनस्पतिं वन आस्थापयध्वं । नि षू दधिध्वम् अखनन्त उत्सम् ।[40]

**वृक्षारोपणम्-** चिकित्सा उपसर्गान् उपद्रवांश्च दूरीकरोति सुस्थामानयति च । रोगोत्पत्तिः च । रोगोत्पत्तिः रोगनाशनं संसारस्य कृते सुस्थतायाश्च कृते अन्यदेकमुपपादनम् । वृक्षरोगचिकित्सा अथर्ववेदे समधिगता विद्यते । एकस्मिन् मन्त्रे उपदिष्टं यत् पलालं तिलपीज चूर्णीकृत्य तन्मिश्रणं वृक्षमूले वितीर्य्यते चेद् वृक्षस्य पुरातनरोगपरिहारद्वारा आरोग्यतां प्राप्नोति । तथाहि –

**वानस्पत्यं चेतनम्-** वृक्षेषु जीवनशक्तिः, चेतनत्वम्, जीववच्चलनादिक्रियाकारकत्वं सर्वं संसक्तं विद्यते । अथर्ववेदात् एतद्विवेचनं समधिगन्तव्यं विद्यते । तत्रोक्तं वृक्षः श्वासक्रियां करोति दण्डायमानः सन् शेते। तथाहि –

1. महद् ब्रह्म..... येन प्राणन्ति वीरुधः ।[41]
2. अस्थुर्वृक्षा ऊर्ध्वस्वप्नाः ।[42]

मरणादनन्तरं जीवो वनस्पतिस्वरूपं गृह्णाति चच्छरीरं प्राप्नोति प्रविशति । एवञ्च वृक्षस्य चेतनत्वकारणात् जातस्य क्षतस्य परिपूरणमचिरादनुष्ठीयते । तथा हि –

1. ओषधीषु प्रतितिष्ठा शरीरैः।[43]
2. तस्माद् वनस्पतीनां संवत्सरे वृक्णमपि रोहति ।[44]

आत्मा वनस्पतिभावेन प्रकाशत इति ऋग्वेदे प्रतिपादितम् । तथा

चेतित्मन् अमर्योऽव ओषधीषु।।[45]

चेतनपदार्थे जीवे रूपचर्यात् आरभ्य जननक्रियां यावत् यावन्ति कार्याणि अपेक्षितानि वर्त्तन्ते तानि सर्वाणि वनस्पतिशरीरचर्य्यायां समाधारितानि सन्तीति विज्ञानविदः आविष्कुर्वन्ति ।

**वनस्पतेः हितसाधकत्वम्-** वनस्पतिद्वारा मानवसमाजस्य कृते महान् लाभः जायते हितकारकत्वमवधार्यते च । एतद्विषयकं निर्वनं विवेचनं वा ऋग्यजुर्वेदोपक्रमाद् अधिगृह्यते । तत्र सुवृष्टिः, मधुरं फलम्, वृष्टार्तं मेघस्याकर्षणम्, अग्निसहशमहच्छक्तेरुत्पत्तिश्चेति सर्वं वनस्पतिसाधनतया विचारितम् इमे च एतत्प्रतिपादकाः मन्त्राः –

1. देवों देवैर्वनस्पतिः हिरण्यपर्णो मधुशाखः सुपिप्पलो देवमिन्द्रम् अवर्धयत् । पृथिवीम्........ अदृश्चं हीद।[46]

देदीप्यमानैः नक्षत्रैः वर्तमानः हिरण्यपर्णः मधुशाखः सुन्दरफलः दिव्यगुणप्रदः वनस्पतिः इन्द्रं वर्धयति प्रकाशं स्पृहयेत् पृथिवीं समन्तात् धरेत् । अत्र तत्कृते प्रत्युक्तानि सर्वाणि विशेषणपदानि जनजीवनहितसाधकार्थप्रतिपादकानि।

2. अयमस्मान् वनस्पतिर्मा च हा मा च रीरिषत् स्वस्त्र्या गृहेभ्य आवसा ।[50]

वृक्ष–वनस्पतिः अममदादीनां रक्षक इत्यसंशयम् । परस्परं प्रतिद्वन्द्वभावि सम्बन्धः कल्याणकारिता समादृता अन्यथा मानवसमाजस्य विनाश एव स्यात् ।

**मानवरक्षकवनस्पतिः-** मानवस्य रक्षकत्वेन वनस्पतीनां विवेचनम् ऋग्वेदे साधितम्। उपकारकः, हितकारी, मङ्गलदायक इति भावेन तच्चिन्तनं विद्यते । इयमेव सा ऋतू –

1. आप ओषधीरुत ताऽवन्तु द्यौर्वना गिरयो वृक्षकेशाः।[51]
2. निषिध्वरीरोषधीरापः ।[52]
3. निष्पिध्वरीस्त ओदृषधीः ।[53]

**अम्लजानदायक वनस्पतिः-** ऋग्वेदे सामवेदे च वनस्पतीनामल्लजानदायकत्वेनोपकारकत्वं मानवसमाजं प्रति अभ्युपगतं विद्यते । वृक्षः स्वस्वभावसिद्ध्या प्रक्रियया स्वस्मात् इतरेभ्यः जडपदार्थेभ्यो जलानि आहत्य अम्लजानं प्रस्तौति, अकुण्ठं प्रहरति । इयं सा प्रवृत्ता प्रक्रिया प्रकाशसंश्लेषणप्रक्रिया ( Photosynthesis ) इत्युच्यते। वेदमन्त्रेषु समानवायु इति

तमोषधीर्दधिरे गर्भमृत्वियं,
तमापो अग्निं जनयन्त मातरः ।
तमित् समानं वनिनश्च वीरुधो – अन्तर्वतीश्च
सुवते च विश्वहा ।।[54]

परिशीलनेन प्रत्येति यत् वृक्षेष्वन्यतमे अश्वत्थवृक्षे अम्लजानस्य जाराणप्रक्रिया सर्वाधिका वर्त्तते । अतोऽयं वृक्षः देवसदन इति सञ्ज्ञां वैचारिकतथ्यं च लभते । अथर्ववेदे प्रतिपादितम् – “अश्वत्थो देवसदनः“[55] इति ।

**वनस्पतीनां देवोपकल्पनत्वम्-** वैदिकवाङ्मये वनस्पतिः देवत्वमागृह्णातीति विचारात् कार्यप्रकारमादाय रुद्रकल्पनायां पूजार्हत्वं समभिवन्दनत्वञ्च यजुर्वेदे पुरस्कृतम् । तथाहि –

नमो वृक्षेभ्यो हरिकेशेभ्यः । क्षेत्राणां पतये नमः ।
वनानां पतये नमः । वृक्षाणां पतये नमः ।
ओषधीनां पतये नमः । कक्षाणां पतये नमः ।[56]

इदमेव याथार्थ्यमवधारितं यद् भगवान् शिवः विषपानं कृत्वा अमृतविहरणे ख्यातिमार्जितवान्। वृक्षः कार्बन–डाइ–अक्ससाइडू ( $Co_2$ ) इति अङ्गारकाम्लरूपि – विषपानुपुरस्सरं अक्सिजेनू ( $O_2$ ) इति अम्लजाजरूपममृतं पहरति, येन जीवसमाजः स्वप्राणमान् सञ्चिनोति। अतो वृक्ष एव रुद्रः। तद्रूपस्य शिवस्याभिवन्दनमभिकाङ्क्षितम्।

ऋग्–यजुरथर्ववेदोक्तप्रतिपादनाधारेण वनस्पतिजगत् जागतिककल्पनया वर्णनाचातुर्यं विवृद्धिसूनि च लब्ध्वा चकास्ति । जगदुत्पत्तिः, जगज्ज्ञानम्, जगद्वर्गीकरणम्, नामान्तरः, जगदुपादेयत्वम्, जगत्प्रतिष्ठा, जगद्रक्षा इत्यादिभावेन विभिन्नेन रूपवैभवेनैकस्य जगतः परकिल्पनं रूपवासनया समधिगम्यते सन्धीयते संरच्यते च । तत्सर्वकल्पनं प्रतिपादनं प्रारूपसाधनञ्च वनस्पतिजगतः कृते वैदिकवाङ्मये रमणीयता विहितमिति प्रतिपादनानुसारं स्फुटता प्रतिपदं प्रयाति। वनस्पतिः जगत्कल्याणार्थमुद्दिष्टा विज्ञानप्रतिपादनानुसारमधिगृहीतेति वेदसन्देशः । तत्प्रदर्शितेन ऋजुनैव मार्गेण प्रेरणां प्रचोदनाञ्चावाप्य वर्त्तितव्यज्जनजीवनं मधुमयं, निरामयं, सुखमयम्, सन्ततिमयम्, अमृतमयम्, शुभमयम्, शान्तिमयम्, ज्ञेयम्, ध्येयम्, चिरं संस्थेयं भवेदिति विभावयन्तु विद्वांसः ।

**पादसूची:**

1. पा. सू. 2-2-8
2. पा. सू. 6-1-157
3. पा. सू. 8-4-6
4. पा.सू. 4-1-49
5. कौषी. 12-7
6. ऐतरेय. 2-4,10
7. अ.को.श्लो.6, पृ.129
8. ऋग्वेद: 7-4-5
9. अथर्ववेद: 8-8-4
10. अथर्ववेद: 8-7-1
11. अथर्ववेद: 8- 7-4
12. अथर्ववेद: 8-7-6
13. ऋग्वेद: 10 97-15
14. अथर्ववेद: 2-3-1
15. अथर्ववेद: 8-7-17
16. अथर्ववेद: 8-7-9-10
17. अथर्ववेद: 2-3-4
18. अथर्ववेद: 2-3-5
19. ऋग्वेद: 10- 97-1-2
20. अजुर्वेद: 12-75-76
21. अथर्ववेद: 10-8-31
22. ऋग्वेद: 10- 97-4
23. ऋग्वेद: 10-97-3
24. ऋग्वेद: 9-12-7
25. ऋग्वेद: 6-47-27
26. ऋग्वेद: 10-65-11
27. ऋग्वेद: 6-48-17
28. यजुर्वेद: 12-78
29. यजुर्वेद: 12-77
30. यजुर्वेद: 29-35
31. यजुर्वेद: 29-52
32. यजुर्वेद: 6-22
33. यजुर्वेद: 14-8
34. यजुर्वेद: 1-25
35. अथर्ववेद: 8- 7-4
36. अथर्ववेद: 8- 7-10
37. अथर्ववेद: 20-76-1
38. अथर्ववेद: 12-3-15
39. अथर्ववेद: 6-125-1
40. अथर्ववेद: 10-10-11
41. अथर्ववेद: 1-32-1
42. अथर्ववेद: 6-44-1
43. अथर्ववेद: 18-2-7
44. अथर्ववेद: 8-10-18
45. ऋग्वेद: 6-12-3
46. यजुर्वेद: 28-20
47. ऋग्वेद: 3-53-20
48. ऋग्वेद: 5-41-11
49. ऋग्वेद: 8-59-2
50. ऋग्वेद: 3-55-22
51. ऋग्वेद: 10-92-6, सामवेद: 1824
52. अथर्ववेद: 6-95-1
53. यजुर्वेद: 16/16-19

**आधार ग्रन्था:**


1. वैयाकरणसिद्धान्तकौमुदी , मोतीलाल बनारसीदासू - देहली, 1991
2. अष्टाध्यायी सूत्रपाट:, चौखम्बाब्तिदायभवनूस वारणासी. 1998
3. आश्वलायन श्रौतसूत्रम्, संस्कृत कलाशाला - बनारस, 1955
4. तैत्तिरीय संहिता, वैदिकसंसोधन मण्डलम्, पने, 1990
5. तैत्तिरीय ब्राह्मणम्, नाग पब्लिषरूस, नवदेहली, 2003
6. शुक्लयजुर्वेदसंहिता, चौखम्बा विद्याभवन्, वारणासी, 2017
7. ऋक्संहिता, नाग पब्लिषसू, नवदेहली, 2004
8. तैत्तिरीयप्रतिशाख्यम्, मोठं श्रीनिवास घोस्यार् & सन्स्, मैसूरु, 1931
9. अथर्ववेदसंहिता
10. सामवेदसंहिता